International Journal of Multidisciplinary Horizon

ISSN: 3049-2017
IJMH 2024; 1(5): 41-43
© 2024 IJMH
www.themultijournal.com
Received: 18-12-2024
Accepted: 26-12-2024
Publish : 28-12-2024

**डॉ. पिताम्बरमिश्रः**
संविदाध्यापकः,
नव्यन्यायविभागः,
केन्द्रियसंस्कृतविश्वविद्यालयः,
श्री सदाशिवपरिसरः, पुरी

**Correspondence:**
**डॉ. पिताम्बरमिश्रः**
संविदाध्यापकः,
नव्यन्यायविभागः,
केन्द्रियसंस्कृतविश्वविद्यालयः,
श्री सदाशिवपरिसरः, पुरी

# दार्शनिकानां मतेषु प्रामाण्यविचारः

**डॉ. पिताम्बरमिश्रः**

**"प्रमाणानां हि प्रामाण्यं स्वतोऽस्तिपरतोऽथवा।**
**गुरुन् तत्वा यथाशास्त्रं वर्ण्यतेऽत्र यथामति"॥**

प्रमाणानां प्रामाण्यविचारे चतस्र विप्रतिपत्तयः सन्ति। तत्र प्रामाण्यमप्रामाण्यमुभयमपि स्वत एवेति सांख्याः । यतो ह्यत्र मते एकतरस्यापि परतस्त्वस्वीकारे सत्कार्यवादस्य हानिः स्यात्। तार्किकास्तू-भयमपि परत एव। अत्रमते वेद ईश्वरोच्यरितः पौरुषेयो विद्यते। अतः वस्तुगत गुणदोषवशात्प्रणेषु प्रामाण्यमप्रामाण्यं निश्चीयते। बौद्धास्तु प्रामाण्यं परत अप्रामाण्यं स्वत एवेति स्वीकुर्वन्ति। बौद्धमतेऽभावो नहि कार्यं भवति। अप्रामाण्यञ्च प्रामाण्याभारुपम्। एवञ्चाभावरूपत्वादप्रामाण्यस्य तत्र स्वतस्त्वम्।

वेदस्यापौरूषेयत्ववादिनां मीमांसकानां मते तु प्रामाण्यं स्वतः गृह्यते अप्रामाण्यन्तु परतः। तत्र सांख्यानामुभयमपि स्वत इति तु न विचारसहम्, प्रामाण्याप्रामाण्ये मिथोविरुद्धौ धर्मौ । तत्काथमेक-कालावच्छेदेनैकत्रोभाववतिष्ठेताम्। किं च शुक्तौ यद्रजतज्ञानं प्रतिपन्नं तत्प्रमाणतया वाऽप्रमाणतया। यदि प्रमाणतया प्रतिपन्नं तर्हि गत्वा समीपं कथं न लभ्यते । रजतं यदि चाप्रामाणतया प्रतिपन्नं तर्हि प्रवर्त्तते कथम् ?

अत उभयमपि स्वत इति त्वसाम्प्रतम्। उभयमपि परतो यथा स्वीक्रियते तदग्रे विचारयामि। बौद्धानां यदप्रामाण्यं स्वतो गृह्यते इति मतं तत्तु बलुकामूलभित्त्याधारितमेवेति पूर्व निपात्यते अत्रायमभिप्रायो मुण्डितानाम् अप्रामाण्यं नाम पामाण्याभावः अत अप्रामाण्यं नास्ति वस्तु। अवस्तुन उत्पत्यभावात् अकारणत्वनपेक्षत्वम्। अतो दोषादपि प्रामाण्याभावरूपमप्रामाण्यं नोत्पन्नं भवतीति सिद्धम्। एवञ्च दोषस्योत्पादकत्वरूप कारणत्वाभावन्नास्ति ज्ञापकत्वमप्रामाण्यस्य। प्रमाण्यन्तु भावरूपं वर्तते। अतस्तदुत्पतै गुणस्यकारणत्व स्वीकारे नास्ति काचिद्विप्रतिपत्तिः।

यद्यप्यत्रमते स्वाप्नज्ञानेऽप्रामाण्यानुपपत्तिः स्यात्। यतोहि दोषाद्प्रामाण्योत्पत्तिस्तु नहि स्वीक्रियते। तथापि तेषामत्रायमभिप्रायः ज्ञानन्तु निसर्गत अयथार्थमेवभवति यदा गुणरूपविशेषकारणवशाद् विरोधि प्रामाण्यमुत्पद्यते तदा ज्ञानस्य स्वाभाविकमप्रामाण्यं विहन्यते। स्वप्नज्ञाने प्रामाण्योत्पादकं नहि भवति किमपि गुणादिकमिति सुरक्षितं ज्ञानस्याप्रामाण्यम्। तदेतत्सर्वमज्ञानविजृम्भितमेव तथाहि अप्रामाण्यं नह्यभावरूपमेवापि तु भावरूपमपि। अप्रामाण्यं मिथ्याऽज्ञानसंशयभेदात्रिविधम्। एषु विपर्ययापरपर्यायं मिथ्यात्वं संशयश्च भावरूपौ। अत अनयोरूपत्पत्तौ दोषा अपेश्यन्त एव। अर्थादयथार्थं ज्ञानं वा ज्ञानत्वात्स्वोत्पतौ ज्ञानसामान्यसामग्रीरपेक्षत एव। अतः अप्रामाण्यमवस्तुत्वान्नापेज्ञते दोषादिकमिति तु साहसमात्रम्।

स्वतः प्रमाण्यवादिनां मीमांसकानामपि मतं यद्यपि न युक्तिसहन्तथापि प्रस्तुयते तदभिप्रायः तथात्वप्रकाशकं हि प्रामाण्यम्। एवं च स्वप्रमेयाव्यभिचारितत्त्वं हि प्रमाणस्य प्रामाण्यम्। तथा च परापेक्षायां सत्यां प्रामाण्यस्य परत इति वक्तुमुचितं स्यात्। न चास्य परापेक्षा क्वचिद् विद्यते, परापेक्षा प्रामाण्योत्पत्तौ वा स्यात्। स्वकार्यकारणे वा स्यात्। प्रामाण्यनिश्चये वा स्यात्। उत्पत्तौ कारकस्वरूप-मात्रापेक्षा स्यात् तदतिरिक्त गुणापेक्षा वा स्यात् कारकस्वरूपमात्रापेक्षायामासात्सुकारणेषु

ज्ञानस्यात्मलाभाभावात् सिद्धसाधनं कारकातिरिक्त तदधिकरण-गुणापेक्षा स्यात्। अप्रामाणिकत्वेनाकाश कुशुमयसदृश वपुषाम-पेक्षणीयत्वाभावात्।

कार्यं द्विविधं भवति यथार्थमयथार्थञ्च, तत्र दुष्टकारणादय यथार्थो-पलब्धिभवतीति लोके दृष्टम्। एवञ्चायथार्थोपलब्धौ दुष्टकारककार्य-त्वेन सिद्धे सति इदानीं तृतीयप्रकारकस्य ज्ञानस्यभाद् यथार्थो-पलब्धिः स्वरूपावस्थितेभ्य एव कारकेभ्योऽवकल्पत इति न गुण-कल्पनाऽऽवश्यकी।

अनुमानेऽपि चैव पक्षताऽन्वयादिसामग्री ज्ञानस्य जनिका सैव प्रामाण्य कारणत्वेन दृष्टा। नहिं स्वरूपावास्थितानिकारणानि कार्यजन्यन्युदासत एव येन यथार्थोपलब्धो तेषां गुणसहकारिता-कल्प्येत। इत्यतो न सन्ति कारणगुणः, स्वरूपातिरिक्तगुणकृता-ञ्जनाद्युपयोगोऽपि दोषप्राहाणायैव न तु गुणजन्मने। तस्मादर्थ-प्रकाशनस्वभावस्यैव स्वहेतोरूत्पादान्नहि प्रामाणं स्वकार्यकारणे किमपि गुणादिकमपेक्षते। अर्थप्रकाशनमेवप्रमाणकार्यम्, तथा चोक्तम्– मृद्दण्डचक्रसूत्रादि धरो जन्मन्यपेक्षते। उदकाहरणे त्वस्य तदपेक्षा न विद्यते।

प्रमाणस्य प्रामाण्यनिश्चयः कारणगुणज्ञानाद् वा भवेद्, बाधका-भावज्ञानाद् वा संवादाद् वा। तत्र कारक गुणज्ञानमिन्द्रियाधीनमिति वक्तुं न शक्यते, अतीन्द्रियकारकाधिकारणत्वेन गुणानां परोक्षत्वात्। अपि चाप्रवृत्तस्य प्रमातुः कार्यपरिशुद्धिर्नभवति। प्रवृत्तिश्च प्रामाण्य-निश्चयपूर्विकां भवति। अन्यथाऽनिश्चित प्रामाण्यादेवज्ञानात् प्रवृत्ति श्चेद् भवेत् तर्हि पश्चात् तन्निर्णयः कृतक्षौरस्य नक्षत्रपरीक्षावद्फल एव। प्रामाण्यनिश्चयात्प्रवृतौ तु चक्रकापत्तिः। प्रवृतौ सत्यां कर्म-परिशुद्धिज्ञानं कार्यपरिशुद्धिज्ञानात् कारण गुणावगतिः कारण-गुणावगतेः प्रामाण्यनिश्चयः प्रामाण्यनिश्चयात् प्रवृत्तिरिति।

नापिबाधकाभावज्ञानात् प्रामाण्यनिश्चयः। बाधकाभावज्ञानं तात्कालिकं वा स्यात्, कालान्तरे भावि वा, तात्कलिकं बाधका-भावज्ञानं न प्रामाण्यनिश्चयात्मकं, कूटकाषपिणादौकिञ्चित्काकमु-त्पन्नबाधकेऽपि कालान्तरे तदुत्पाददर्शनात्। सर्वथा बाधका-भावज्ञनत्व सर्वज्ञासम्भवम्। संवादात् प्रामाण्यनिश्चयो भवतीति पक्षे कः संवादः ? किमुत्तरविषयषेयं ज्ञानमात्रामथवाऽर्थान्तरज्ञानभूतार्थ क्रियाज्ञानम्। यदुत्तरविषयं ज्ञानमात्र तर्हि कः पूर्वोत्तरयोज्ञानयो विशेषो युदुत्तरज्ञासंवादात् पूर्वस्मिन् ज्ञानं प्रामाण्यं निश्चीयते। किमपराद्धं प्राथमिकेन ज्ञानेन यद्यत्र प्रामाण्यं नाङ्गीक्रियते। यद् सन्तिरज्ञानस्य संवादः इत्युच्यते तदप्ययुक्तं नहि पटज्ञानं घटज्ञानस्य संवादः। यद्यर्थक्रियाज्ञानसंवादात् प्रथमस्य प्रवर्त्तकस्य ज्ञानस्य प्रामाण्यमिष्यते तर्हि इदमुच्यतो क अर्थक्रियाज्ञानस्य पूर्वस्माद् विशेषो यत्तेनपूर्वस्मिन् ज्ञाने प्रामाण्यं निर्णीयते। यद्यर्थक्रिया-ज्ञानत्वमेव विशेष जलज्ञानमाद्यं दृष्टमिति न भवति विश्वासभूमिः, किं च अर्थक्रियाज्ञान अप्रवृत्तस्य पुरूषस्य नहि भवति। तत्र प्रामाण्यावधारणपूर्विकायां प्रवृत्तौ कारणगुणनिश्चेय प्रामाण्यचर्या-चक्रक प्रसङ्गस्तदवस्था एव।

तदेवं न कुतश्चिदपि प्रामाण्यनिश्चयः। अतः प्रामाण्यनिश्चयेऽपि न किञ्चिदपेक्षते प्रामाणम्। एवं चोत्पत्तौ स्वकार्यकारणे, स्वप्रामाण्य-निश्चये च निरपेक्षत्वात् प्रामाण्यं स्वत इति स्वीक्रियताम्।

अत्राहुः प्रमाणग्रहनकाननविहरणपरायणपञ्चाननाः करूणाचणा-स्तार्किकाः स्वतः प्रामाण्यमित्यर्थस्य कोऽर्थः ? किं स्वत एव प्रमाणस्य प्रामाण्यं भवति अथवा स्वयमेव प्रामाणमात्मनः प्रामाण्यं गृह्णाति। तत्र नहि तावत्स्वयमेव प्रामाण्यंग्रहणं युक्तमप्रामा-णिकत्वात्। नतावत् स्वप्रामाण्यपरिच्छेदे प्रत्यक्षं प्रमाणं तद् विज्ञानस्य वा प्रामाण्यं गृहणीयात्। अर्थप्रकाशनरूपफलस्या-प्यतीन्द्रियतया तद्गतमपि प्रामाप्यं नहीन्द्रियव्यापार प्राक्जन्मना प्रत्यक्षेणपरिच्छिद्यते। न च मानसमपि प्रत्यक्षं फलगतयथार्थ-तावधारण समर्थं तदानीमननुभूयमानत्वात् नहि नीलज्ञानोत्पत्ति समनन्तरं यथार्थेदंनीलज्ञानमिति ज्ञानान्तरमुत्पद्यमानमनुभूयते। अनुभवे तु द्वितीयज्ञानात् प्रथमोत्पन्न नीलज्ञान यथार्थग्रहणं न स्वतः प्रामाण्य निश्चयः । तस्मान्न प्रत्यक्षस्यायं विषयः। नाप्यानुमानेन प्रामाण्यनिश्चयकर्तुं शक्यते। अनुमानेन कस्य प्रामाण्यं निश्चीयते ? ज्ञानस्य फलस्य वा ज्ञानस्य पक्षे तु पूर्ववदेवशक्यत्वम्। फलस्य तावन्निश्चये नहि प्रसवसमय एव ज्ञानस्य प्रामाण्यं निश्चिनुयाम तर्हि स्वततः प्रवर्तमानाः न क्वचिदपि विप्रलभ्येयुः विप्रलभ्यन्ते तु।

तस्मान्मन्ये नहि निश्चितं प्रमाणस्य प्रामाण्यमपितु संशयादेव व्यवहरामः। ननु प्रवृत्तिसमये संशयोऽपि नानुभूयते एव किमिदं रजतमित्याकारकमपि रजतमित्येव तदा प्रतीयते। नहि संशयं कुर्वाण एव प्रवर्त्तन्ते व्यावहारिकाः अपितु निश्चिन्वन्त एवेति कथमुच्यते संशयात्प्रवर्तामहे।

अत्रोच्यते एकतरग्रहणाय बोधो निश्चयसाधकाभावाद् वलात्संशय-कोरौ पतति। यथा भिक्षवः अस्तिकूपे जलमिति मन्यन्ते। तथा रजतमित्येकपक्षग्राह्यपि प्रतिभासो वस्तुवृत्तेन तदानीं संशय एव। यदिहि प्रमाणतयाऽसौ गृह्येत कथं क्वचिद्विसंवदेत्। अप्रामाणतया यदि गृह्येत् कथं तर्हि प्रवृतो भवेत्। अतः प्रमाणतयाऽप्माणतया वा आग्रहणात्संशयात्मकं एक स रजतमित्याकारको बोधः। एवञ्च प्रामाण्यग्रहणमेव संशयशब्देनात्र व्यवहरामो न तु सर्वथा संशय-समर्थन एवास्माकमभिनिवेशः। तथा च प्रत्यक्षेणानुमानेनसता वा प्रमाणेनात्मनः प्रमाणत्वावच्छेदायोगात् स्वयं प्रामाण्यं गृह्यत इत्येष दुर्धरः पक्षः।

यदि च स्वतः प्रामाण्यं भवतीत्येषः भवतीत्येषः पक्ष आश्रीयते सोऽप्ययुक्त एव। प्रामाण्यस्य कार्यत्वात्, कार्याणां कारणधीनोत्पत्तिकत्वात्। कार्यं च कार्यत्वादेव न स्वतो भवितुमर्हत्। यदि स्वोत्पत्तौस्वकारकातिरिक्तगुणानपेक्षितत्वमेवेति गृह्यते, तदपि न समीचीनम् सम्यग् रूपस्य कार्य गुणवत्कारकं विनानुत्पादात्। वैद्याः स्वस्यवृत्तेरोंशधो प्रयोगं यदुपदिशन्ति तद्गुणोपयोगायै व न तु दोषशान्तये। दृश्यते च वैद्योपदिष्टौषधिं सेवनादिन्द्रियातिशयः। तद्विषय एव लोके नैर्मल्यव्यपदेशो न तु दोषाभावाभिप्रायमात्रे। अत उत्पत्तौ गुणानपेक्षत् स्वतः प्रामाण्यमिति यदुक्तं तदयुक्तमेव।

यच्च स्वकार्यकरणे प्रमाणस्य परानपेक्षत्वमुक्त तत् किं प्रमाणं स्वकार्यकरणे निरपेक्षं सामग्री वा। तदेकदेशो वा तज्जन्यं ज्ञानं वा। सामग्यास्तु स्वकार्यजनने सत्यं निरपेक्षताऽस्ति, परन्तु नहिं तावता स्वतः प्रामाण्यं सिद्ध्यति। तत्परिच्छेदस्य पराधीनत्वात्। सामग्यान्तरगतत्वात् कारकविशेषस्य परापेक्षात्व परिहार्यमेव। एकस्मात् कारकात् कार्यनिष्पत्यभावात्। ज्ञानन्तु फलमेव न प्रमाणमिति फलत्मनोस्तस्य न किञ्चित्कार्यमस्ति। येन तस्य सापेक्षत्वमनपेक्षत्वं वा चिन्तनीयं भवेत्। प्रवृत्यादौ पुरूषेच्छापेक्षत्वं विद्यत एव। प्रामाण्यनिश्चये यन्नैरपेक्ष्यमुक्तं तदपि न मनोरमम्। प्रामाण्यनिश्चयस्य द्वयी एव गतिः नास्ति स्वकारणपेक्षिता वा। न पुनरस्ति च प्रामाण्यनिश्चयः कारणानपेक्षश्चेति वक्तुमुचितम्। नहि नीलग्राहीणा प्रमाणेन नीलस्वरूपमेव स्वप्रामाण्यमपि। तदानीं निश्चेतुं शक्यते, अतः प्रथमप्रवर्त्तक प्रतिभासप्रसवसमये तावन्नास्त्येव प्रामाण्यनिश्चयः। कालान्तरे तत्प्रामाण्यनिश्चयः सत्यमस्ति न तु तत्र निरपेक्षता, प्रवृत्तिसामर्थ्याधीनत्वात् स्वप्रामाण्यनिश्चयस्य। कालान्तरे प्रामाण्यनिश्चयं इतरेतराश्रयत्वं मुण्डितशिरो नक्षत्रान्वेषणवद् वैयर्थ्यमिति, यददुषणमुक्तं तत्रादृष्टे विषये प्रामाण्यनिश्चित पूर्विकायाः प्रवृत्तेरभ्युपगमान्नेतरेतराश्रयं चक्रकं वा। दृष्टे विषये अनिश्चत प्रामाण्य एवार्थसंशयास्प्रवृत्तिरूपमनर्थं संशयाच्च निवृत्यात्मकं व्यवहारमारम्भमाणो दृश्यते लोकः एतदेव युक्तम्। न प्रामाण्यनिश्चियपुरःसराप्रवृत्तिरिति कुतः इतरेतराश्रयं चक्रकं वा। दृष्टे विषये सत्यं प्रामाण्यनिश्चयस्य वैयर्थ्यन्तथापि तत्र प्रवृत्तिसार्थ्येन प्रामाण्यं निश्चिन्वन्नाप्रोक्तत्वस्य हेतोः प्रमाण्येन व्यप्तिं गृह्णाति। तथा अदृष्टविषयोपयोगि वेदादिप्रमाणप्रामाण्य परिच्छेदे परम्पर्येणोपायत्वात्स्वविषये व्यर्थोऽप्यसौ। तत्र सार्थक्यं भवत इत्यदोषः।

द्रष्टव्यपुस्तकानि –

1. न्यायसिद्धान्तमुक्तावली
2. कारिकावली
3. सर्वदर्शनसंग्रहः
4. बौद्धतर्कभाषा
5. न्यायदर्शनम्
6. सांख्यकारिका इत्यादयः